# जैन रक्षा स्तोत्र

सर्व संकट, उपद्रव नाशक, शांतिकारक जैन रक्षा स्तोत्र को प्रातः काल शुद्ध मन से पाठ करना चाहिये। किसी विशेष कार्य की सिद्धि, धन की प्राप्ति के लिये इस स्तोत्र को श्रावण सुदी अष्टमी से शुरू करें। दोनों समय आठ दिन तक विधिवत् पाठ करें। भगवान की प्रतिमा के सामने चौकी पर घी का दीपक जलायें। १०८ बार स्तोत्र बोलें। एक समय शुद्ध भोजन करें। शुद्ध वस्त्र पहन कर पाठ करें। जो इस स्तोत्र के केसर के अक्षर, अनार की कलम से भोजपत्र पर लिखकर मस्तक पर धारण करता है, उसको सभी प्रकार का मनवांछित लाभ होता है।

श्रीजिनं भक्तितो नत्वा, त्रैलोक्याजादकारकम्।
जैनरक्षामहं वक्ष्ये, देहिनां देहरक्षकम् ॥१॥

ॐ ह्रीं आदीश्वरः पातु, शिरसि सर्वदा मम।
ॐ ह्रीं श्री अजितो देवो, भालं रक्षतु सर्वदा ॥२॥

नेत्रयोः रक्षकों भूयात्, ॐ आं क्रौं सम्भवो जिनः।
रक्षेद् घ्राणेन्द्रियं श्रीं, क्लीं ब्लूं श्री अभिनन्दनः ॥३॥

सु जिह्वा सुमुखे पातु सुमतिः प्राणवान्वितः।
कर्णयोः ॐ ह्रीं श्री पृक्तः, पातु नित्यं पद्मप्रभः ॥४॥

सुपार्श्वः सप्तमः पातु ग्रीवायां ह्रीं श्रियाश्रितः।
पातु चन्द्रप्रभः श्री ह्रीं क्रौं, पूर्व स्कन्धयोर्मम ॥५॥

सुविधि शीतलो नाथो, रक्षको करपंकजे।
ॐ क्षां क्षीं क्षूं क्षौं कामं जिनानन्दमयौ शुभौ ॥६॥

श्रेयांसो वासपूज्यो मे हृदयो सदयं यथा।
भूयाद् रक्षाकरो घोरं, सारं श्री प्रणवांकितौ ॥७॥

विमलानन्तनाथौ च, माया बीज समन्वितौ।
उदरे सुन्दरे संघौ, रक्षाया कारकौ मतौ ॥८॥

श्री धर्मशान्ति-नामानौ, नाभियंके रुहे सदा।
ॐ ह्रीं श्री क्लीं संयुक्तं पुण्यं पातां पुनः पुनः ॥९॥

श्री कुंथु अर-नायश्च, सगुह्ये सकटी तटे।
भवेतामवकौ भूरिः ॐ ह्रीं क्लीं सहितौ जिनौ ॥१०॥

मे पातां चारु जंघायां, मल्लिश्रीमुनिसुव्रतौ।
ॐ ह्रीं द्रां द्रीं ततोद्रूं ब्लूं, क्लीं श्रीं युक्तौ कृपाकरौ॥११॥

सयत्नं रक्षकौ जानू, श्री नमि नेमि नायकौ।
राज्य रसाज्यमती मुक्तौ, प्रणवाक्षर पूर्वकौ॥१२॥

श्री पार्श्व श्री महावीरौ, पातमंघ्रौ सुसातहौ।
ॐ ह्रीं श्रीं च तथा वभ्र, क्लीं ह्रां ह्रीं श्री संयुक्तौ जिनौ॥१३॥

रक्षाकरौ यथा स्थाने, भवन्तु जिन-नायकाः।
कर्मक्षयकराः ध्याताः, भीतानां भयवाटकाः॥१४॥

जैनरक्षां लिखित्वेमां, मस्तके यस्तु धारयेत्।
रविवद् दीप्यते लोके, श्रीमान् विश्वप्रियो भवेत्॥१५॥

तस्योग्ररोग - वेताला, शाकिनीभूतराक्षसाः।
एते दोषाः न दृश्यन्ते, रक्षकाश्च भवन्त्यमी॥१६॥

अग्नि-सर्प-भ्योत्पाता, भूपाल-चौर विग्रहाः।
एते दोषाः न दृश्यन्ते, रक्षकाश्च भवन्त्यमी॥१७॥

जैनरक्षामियं भक्तया प्रातरुत्थाय यः पठेत्।
ईप्सितान् लभते कामान् सम्पदश्च पदे पदे ॥१८॥

श्रवणे च शुक्लाष्टम्यामारभेत्स्तोत्रमुक्तमम्।
अभिषेकं जिनेन्द्राणं, कारयेत् दिवसाष्टकम्॥१९॥



ब्रह्मचर्य विघातव्यमेकभुक्तं तथैव च।
शुचिताशुभवस्त्रेण, वालंकारादिशोभितः॥२०॥

नरो वापि यथा नारी, शुद्धभावयुतोपि सन्।
दिने दिने यथा कुर्यात्, जाप्यं सर्वार्थसिद्धिदं॥२१॥

एकाशनं विघातव्यमुद्यापन - महोत्सवं।
पूजाविधिसमायुक्तं, कर्त्तव्यं सुजनैः जनैः॥२२॥



* * *